॥आधानप्रकरणप्रायश्चित॥

अनैतदेवकृतप्रायश्चित

॥श्रीगणेशायनमः॥ ॥ॐहरिः॥ ॥अथधानप्रकरणं॥ ॥आहिताग्नेर्वजनकेत्रा
तर्यपिसहोदरे आदधीतस्वयंजायामवाप्यदशमेऽहनि तदतिक्रमेणेदोषः सऽदा
नीनिरूप्यते तत्रविस्मुयाज्ञवल्क्यो गोवधोऽात्मजास्तेयमरणानांचातूपक्रिया
अनाहितांग्नितापण्यविक्रियःपरिवेदनमित्युपक्रम्यउपयातकिनःस्त्वेतेकुर्यु।
श्चांड्रायणंनराः पाराकमथवाकुर्युरिति उपातमुद्दिःस्यादेवंचांड्रायणेनवा
पयसावापिमासेनपाराकेणाथवाऽनरिति इदंचकामकारे कामकारेतु त्रे रामः
मासिकमितिमाधवः आहिताग्नेर्बुद्दिश्यैकमग्नित्यागेशंखः अमुत्सादीसंव १
त्सरं प्राजापत्यंचरेऽांचदद्यादिति द्वादशातिक्रमेत्वहमुपवासः मासातिक्रमे

द्वादशाहं संवत्सरातिक्रमेमासोपवासः पयोनक्षणवा अकामकारेतुप्राणा।
यामज्ञातमाद्दशरात्रं उपवासम्पादाविंशतिरात्रं त्रिरात्रमुपवसेदीघट्टिरात्रं अ
तऊर्ध्वमासंवत्सरात्प्राजापत्यं ऊर्ध्वकालत्वऊत्वेदोषवऊत्वमितिमारद्वाजगृह्य
ते नास्तिक्यादग्नित्यागेत्र योग्नित्यजतीनास्तिक्यात्प्राजापत्यंचरेद्विजइति।
माधवस्त्वसिप्राजापत्यस्योपलक्षणत्वात्यागकालस्यगौरवेऽतांतरेणपुनर्ग्रह्या
नीतिमाधवः यस्तुपित्रादेरनाहित्वाग्नितयास्वयमनधीकारीतस्यतुदाधान।
करणेप्रायश्चित्तं यएतादृशोप्यादध्यात्सपरिवेत्ता तस्यकामकारेसंवत्सरंप्राजाप
त्येनशुद्धिरितिहारीतः शंखस्तु परिविन्नःपरिवेत्ताचसंवत्सरंब्राह्मणगृहेषुभै।

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

क्षंचरेयातामिति अकामकारेतुत्रैमासिकमनुः प्रायश्चित्तप्रदीपे योज्येष्टेग्न्याधानरि
क्तेस्वयमाधानंकरोतिसर्वयीधानः ज्येष्टःपत्नीरिक्तः अनयास्तत्पुरुषप्रायश्चित्ता
नंतरंमनस्वतीहोमइति आधानसंकल्पाऽर्ध्वंयजमानस्यवरणोर्ध्वमृत्विजांवरणा
ताधाग्नेयसंनवेस्नानमात्रेणशुद्धिरितिएतत्प्रपंचोग्रवक्ष्यते अथवृत्तानामृत्वि
जांयजमानस्यवास्वप्नेरेतोविसर्गेप्रायश्चित्तं प्रायश्चित्तप्रश्ने स्मार्त्तवदाज्यंसंस्कृ
त्य इमंमेवरुणतत्वायामीतिद्वाभ्यांस्तुवाङ्कृतीर्जुह्वयात् वरुणायेदमितिस्वि
गः ततःपुनर्मामैत्विंद्रियमितिअनुवाकंजपेदितिपा०पे आधानप्रथमप्रयो
गेप्रक्रांतेसंकल्पाऽर्ध्वंपत्न्यामनालंनुक्तायांप्रक्रांतंप्रयोगमुत्सृज्यकालांतरे



पुनःप्रक्रमादधीत वह्निपत्नीकोप्येवं इदमादक्षिणादानं दक्षिणादानोर्ध्वंवि
दपरुध्मसमापनं इष्टीकृतेरनंतरंमनालंनुकायामपरुध्मसमापनं नप्रयोगमु
त्सृजेदित्यपिकेचित् गार्हपत्याधानोत्तरमनालंनुकावेत्तामपरुध्मसमापयेत्
ततःपूर्वंचेत्प्रयोगोत्सर्गइतिज्ञातव्यं द्वितीयाधानेतुसंकल्पात्पूर्वमनालंनु
कायांकालंतरं संकल्पोर्ध्वमनालंनुकायांतुत्रपरुध्मसमापनमितिविशेष
: आधानेसंन्नतानांसंनाराणांअग्नेधायुपहतावपहतौवाग्नेर्दाहेवारु
त्वस्यैकदेशस्यवानाशेतत्सज्ञानीयंतत्तन्मंत्रेणादायततत्स्थानेऽर्वंवत्सा
दयित्वाज्यंसंस्कृत्यबर्हिरोदनाग्नौसुवाङ्कृतीर्जुह्वयात् त्वमग्नेअद्यासिः पत्ना

पेतेनत्वदेतां० अग्नयेअयसइदं पुजापतयइदं यस्यनाम्नःस्तस्यतन्मंत्रेणइ।
नसंस्मरणं सर्वेषांयुगपन्नामोसर्वेमंत्रैःपूर्ववत्संस्कृत्यैवमेवकुर्यात् गोपितृयज्ञा
ग्निनाम्नोयथाऽर्वंमाहृत्याज्यंसंस्कृत्यस्रुवेणाव्यस्तसमस्तव्याहृतीःक्रमेणगोपि
तृयज्ञाग्नौजुह्वयात् अतीव्रणीतोल्मुकनाम्नोपुनराहृत्योल्मुकाग्नेर्दक्षिणाग्नौ
वघ्रयेकंव्यस्तसमस्तव्याहृतीर्जुह्वयात् गोपितृयज्ञसंस्मारनाम्नोपिपूर्ववत्संस्मा
रनाम्नोरुंग्रायश्चित्तंगोपितृयज्ञाग्नौकुर्यात् अश्वलायनयजमानःसर्वौषधि
होमात्माकृत्रौपासनाग्नमनुगमेत्रयाश्चाग्नेःनेषजंस्वाहेतिपुनःसंधायसर्वौष
धिहोमादिकुर्यात् सर्वौषधिहोमाऽर्ध्वंब्रह्मौदनपाकात्माकृत्यद्यनुगतस्तदापि

रामः
३

पूर्ववत् ग्रायश्चित्तं ब्रह्मौदनपाकाऽर्ध्वं [illegible] समारोपणात्माग
नुगतावप्येवं संवत्सरादिधारणपक्षेपुनःपुनरुद्धातेपिसर्वौषधहोमादिब्रह्मौ
दनपाक त्रौपासनस्मार्तकर्माणिचतत्रैवविदधतास्त्रौपासत्वानपगबोधनात्
इदंचसर्वंसर्वाधानविषयं अग्न्याधानपक्षेतत्रार्ष्टावसिष्टादेवाहरणंसर्वंग्राय
श्चित्तंनाद्यश्चेतिविशेषः पुनराधानेत्सर्वाधानानिनत्रौपासनाग्नमनावात्ब्रा
ह्मौदनार्थमग्न्युत्पत्तिर्वैधायनोक्तापुनस्त्वादित्येति एवंसिद्धेग्नौसर्वौषधिहोमा
त्मागनुगतेयाजुषमयाश्चाग्नेरनिष्टास्तीश्चसत्वमित्यमयाऽसि अयसामयसा
धृतोयासंन्हव्यमूहिषेयानोधेहिनेषजं स्वाहेतिमंत्रांविनियोजयेदाश्वलाय

नोपि अर्धाधानिनः औपासनसत्वात्स्वीयमेवप्रायश्चित्तं सर्वाधानपक्षेपिरजस्वला
दिनिमित्तेनसूर्योदयेप्रक्रांतप्रयोगमुत्सृज्यकालांतरेपुनरारंभपक्षेपिस्वशारवीयप्राय
श्चित्तेनैवाग्निसिद्धिः एवमार्तादिनापुनराधेयेपिद्रोधं ब्रह्मोदनार्थस्थालीनेदे
मग्नांतामग्निन्योद्यर्मइत्यनिमंत्र्यधर्मोदेवानित्यर्न्यस्थालीनिधायमग्नामाशुपक्षि
प्यत्रह्मोदनाग्नौसर्वप्रायश्चित्तंजुहुयात् ब्रह्मोदनार्थचरोरुत्सेकेवक्ष्यमाणदर्शेष्
टीमासोरुंप्रायश्चित्तज्ञेयं अन्यूताज्यग्रोषनाग्नेअनम्यक्तासमिधआधेयाइतिरा रामः
मांडारः विस्मृताश्चेत् अनाहितस्तस्याग्नेर्यः समिधोनाधायाग्निमाधत्तइतिश्रु
तेः पुनराधानप्रयोगः कर्त्तव्यः ब्रह्मोदनपाकाऽर्ध्वंनिष्टपनात्प्राग्मनुगमेऽर्ध्ववद् ध

ग्निमुत्सृज्यब्रह्मोदनांतंकुर्यात् मंथनानंतरंजातेग्निरुद्वातश्चेत्प्रक्रांतंप्रयोगमु
त्सृज्यकालांतरेआदधीत केचित्तुमंथनेनजातस्याग्नेर्वरदानात्सर्वमनुगमेपुन
र्मंथनमेव वरदानोत्तरंसंनारेषुनिधानात्प्राक्त्रनुगमेपि अनाज्ञातंपुरुषसं
मि० यत्पाकत्रेति० ऋक्त्रयंजपित्वापुनर्मंथनमेवकार्यं नारब्धप्रयोगत्यागत्पा
ऊः विहताग्नयोमाकश्चनांतरेणसंचारीदितिप्रेषोत्तरंमध्येसंचारेवक्ष्यमाणप्र
वायप्रायश्चित्तंकार्यं गार्हपत्याधानात्सूर्वंसूर्योदयेसतिप्रक्रांतप्रयोगमुत्सृज्य
कालांतरेआदधीत सूर्योदयात्सूर्वंआहवनीयाधानेतंपुनरायतनेनिधायसर्व
प्रायश्चित्तंकृत्वाकालेपणयेत् गार्हपत्येतनुहविषाऽर्वंमनुगतेदक्षिणाग्नौआ

हनीयेचयूर्णीऊतेः प्रागनुगतेप्रयोगमुत्सृज्यकालांतरेआदधीत श्रूर्णीऊतेरू-
र्ध्वंतनुहविःसमाप्तेःश्रूर्वंदक्षिणाग्नाहवनीययोरनुगमेगार्हपत्यातोक्रमेणश्रू
वंदाधानविधिनाधाय्यसंवीघधिरोमादिविराक्रमोपस्थानादितंकृत्वा तत्रसं ना
रोत्पयुत्पतिःनःश्रूर्णीऊतिंकुर्यात् उभयोरन्वाधानंव्याहृतिनिरुपस्थानंचरु
त्वातनुहविषामुपक्रांतप्रयोगमवशिष्टंसमापयेत् अग्निहोत्रहोमोपक्रमात्सा
कृसर्वाग्निनाशेगार्हपत्यमात्रनाशेचाग्माधानं पौर्णमासोपक्रमात्यागपिसर्वा-
ग्नीनांगार्हपत्यस्यवानाशेप्यग्माधानंकर्त्तव्यमितिचंद्रिकायां श्रूर्णीघ्रूणाऊतेः
श्रूर्वंकस्माप्यंगस्याकरणेश्रूर्णीऊत्यनंतरंत्वनोग्नेसत्वन्नोग्नइतिआहवनी

येस्रुवाऊंतिंऊत्वादक्षिणाग्नेनुवः स्वाहेतियजुन्त्रेघनिमितांस्रुवाऊतिंजुऊया
त् समारोपणोतरंवाकुंमंथनात् अरणेरुपघातापहारनाशेषुपक्रांतप्रयोगमु
रस्रुज्यकालांतरआदधीत आहवनीयाधानवेलायांमेघादिनासूर्येनाविनीवे
आधानपवमासेस्मार्ध्येरविरदर्शनेसूर्यचंद्रमसोर्वाग्रहणेतासूर्यचंद्रमसा
वितिषड्भिः स्रुवाऊतीर्जुऊयादितिकेचित् उऊत्यंचित्रंदेवानामितिसूर्यग्रहे
नवोनवो० यमादित्याइतिचंद्रग्रहेस्वग्नइतिचंद्रिकायां इत्याधानप्रायश्चित्ता
नि एवंसमाप्याधानप्रयोगोयैर्निमितैः पुनरावर्त्ततेतान्यधुनानिधीयंते वि
नाग्निनिर्यदापत्नीनदीमंऽबुधिगामिनी अतिक्रामेत्तदाग्नीनाविनाशस्मादि

तिश्रुतिः पत्नीसीमामतिक्रांतायजमानइहैवेत्य आहोमाद्यदिनागच्छेत्सु
नराधानमर्हतिइहैवह्यहिःसीमातोबहिरेवेतर्थः रजोदोषेसमुत्पन्नेमृत
केपिवा ध्वस्तेग्निमान्विप्रःपुनराधानमर्हति यस्याग्निमानसमारूढा
ग्निमान्वेत्यर्थः ज्येष्ठान्चारंनयक्षेकनिष्ठायारजोदोषादावपिनदोषः नदीसत
रणेग्नीनांसीमातिक्रमणेतथा सर्वत्राद्यंतसीम्नोर्वीस्वामिस्पृष्टास्वग्नयः यस्य
क्षमरणीद्वारंचान्यथाग्निविनाशनं नाशापहारावग्नीनांयद्वाहरणेर्थदा कु रामः
र्यादेवंपुनराधानमितिबौधायनोब्रवीत् आरूढोपियथाशास्त्रमवरूढोनशास्त्र ६
तः तृतीयहोमकालेयसंप्राप्तेपुनराहितिः जातोपिचविनाग्नेस्मस्यग्नेर्जातंज

पंविना त्रायश्चित्तेविनाकाष्टमंथनेवेदितंविना लौकिकस्यादतोलुप्तारेदोमा
वर्तयेत्पुनः यदिनवर्तनेद्धोतारंत्रेषवजुहोतिच श्रूयमानेपिलुप्येतहोमा
कालाष्टकात्परं लुप्तेहोमेद्वयेप्याहालोगाक्षीरलोहित उपघातक्रियालोपश्च
पेक्षाचप्रमादतः चतुर्विधमिदंप्रोक्तंपुनरानरकारणं यस्मिन्कर्मणांलोपः
उपघातोत्पन्नादिना उपेक्षाचप्रवासादौप्रमादोग्नेरधारणं अग्नावनुगतेयस्य
होमकालद्वयंव्रजेत् उभयोविप्रवासोवालौकिकोग्निविधीयते अग्निहोत्रेण
रहितः पंथानंश्रोत्रियोजनं आहिताग्निःप्रयायेद्वेदग्निहोत्रंनपश्यति विहाया
ग्निसनार्य्यश्चेत्सीमामुल्लंध्यगच्छति होमकालात्ययेतस्यपुनराधानमिष्यते सी

माग्रामस्यवास्तुनेवा खरोष्ट्रयुक्तेनारीसमारुह्यथवाशुमान् योजनेयोजनेरु
द्धमग्निश्चापिविनश्यति सीमांतेतुयदापत्नीएकरात्रमवस्थिता वीरहत्यानवेतत्र
पुनराधानमर्हति अथास्यापवादः पत्न्यंतरेथवापत्नीजतान्नसमीपगे तथा
पत्नीयथाकामंअतिक्रामेन्नदीमपि आसमुद्रगामिनीमित्याहुः एकाकिनीय
दापत्नीवन्हिमादायगच्छति अग्निनाशंपरेत्वाऽनीयाधानेनउष्यति नस्त्र्येका
किनीपत्नीप्रयायाद्ग्निःसह राष्ट्रंत्रज्यादिसंत्रासावुदितंयातुमीदृशं नक्षाप्यार
मणंकेचिल्लोगाक्ष्यादिनिबंधनात् उदक्याचेन्नवेत्पत्नी प्रसूताप्रसवंत्यपि अन्वा
रंभविकल्पात्वानुराधिर्नतन्मतान् ज्येष्ठान्वारंभतेवन्हीबऽजनार्यस्पनेतरा ॥ रामः ७

आपद्यग्नीषुदीप्तेषुमासार्द्धंचेन्नहूयते सर्वेहोमानतिक्रांतान्पक्षांतेपक्षहो
मवत् समस्यनुऽक्रियात्पक्षादिष्टिस्तुमतीनवेत् नतत्रपुनराधेयमितिकौषी
तकीश्रुतिः वत्सरंवत्सरार्द्धंवाहोमलोपेमतांतरे आपत्कालेनपश्यंतिदीप्तं
तेचेच्छुताग्नयः एकस्मामप्यतिष्टंत्यामग्निहोत्रसमीपतः पतिस्तिष्ठतिचेदग्नि
नाशोनेत्यपरेविदुः श्रुतिश्चपुनराधानप्रकारणं जायमानोवैब्राह्मणः त्रिभि
रृणवाजायतेब्रह्मचर्येणऋषिभ्योयज्ञेनदेवेभ्यः प्रजयापितृभ्यइतिप्रजातं
तुमाममत्सेत्सीरित्यादिश्रुतिभ्यः पत्न्युत्पत्तेरुतदारांतरपरिग्रहस्यसर्वाधानि
नत्राहिताग्नेः अग्निक्षयसंसर्गविधिरुच्यते जायामवाप्यदारामेष्ट्वैकादशेवा

आहिताग्निरणोरग्नीत्समारोप्येदवसायमथित्वाग्नीन्विहृत्याग्नेयमष्टाकपाले
वैश्वानरंद्वादशकपालंमितिद्विहविषामिष्टिंकृत्वाविस्नानाग्नौऔपासनाग्निं
संसिसृक्षुः वितानाग्नौऔपासनाग्निसंसर्गनिमित्तंवाअग्नीनाधास्यन्नितिसंक
ल्प ज्येष्ठानार्यीन्वारब्धोअरणेपर्वन्हीन्समारोप्यसंनारस्यन्नादिसर्वौषधिहो
मांतंकुर्यात् कनिष्ठोपासनाग्नौसर्वौषधिहोमः ततःतस्मिन्नेवाग्नौब्रह्मौदन
श्रपयित्वापत्नीद्वयेन्वारब्धःअधरोत्तरारणीनिष्पनंकुर्यात् ततःपावमानेष्टिं
ष्टिंकुर्यात् एवमविरुतमाधानप्रयोगंसमाप्यतंतुमतीकुर्यात् ततःपवित्रेष्टिं
कृत्वात्रेधातवीयंकुर्यात् अथाधानंतुशौनकोक्तप्रकारेणास्मार्त्तद्वयसंसर्गेष्टिं

MORIAL

त्वाश्वर्वत् सर्वकार्यवत् त्रिकांडमंडनः आहिताग्निःप्रजाहीनोंयोषापत्यांम्र
तप्रजां देयेद्वादशेपंचदशेसंवत्सरेस्त्रियं त्यत्कान्यामुद्वयेत्कन्यांसद्यस्त्वाप्रियवा
दिनी आरोप्याग्निमधारणेारुदवस्येत्सहाग्निनिः उद्वासनेष्टिंकृत्वाथतमारो
प्यहविर्नुजं कृत्वाब्रह्मौदनाग्निंवतथोपासनपायकं ब्रह्मौदनाग्निंकंसिद्धेका
त्वाग्निंविधानतः पवित्रेष्टींतंतुमतीत्रेधातवांक्रमाद्यजेत् ऐंद्राग्नेनैवपशुना
यष्टव्यंरवलेनवा अथवापुनराधानमेवात्रेष्टंनचेतरत् धर्मप्रजासम्द्धेषुदा
रेषुयदिलोनतः अन्यामुद्वहेद्यदिनतदाश्वादितोविधिः अनुष्टायमृगारे
ष्ठायजेतेवात्मभुद्वये नादधाद्यामृगारेष्टिंपूर्वपत्न्यासहावरेदि

दि अत्राह्नगवान्बौधायनः यद्याहिताग्नेः प्रजानोत्पद्येतकथंतत्रकुर्यादिति
उनरवकुमारीऽसंस्कृत्य दशमेऽह्नेकादशेद्वादशेवारण्याग्नीनसमारोप्योपास
नेब्रह्मौदनंश्रपयित्वोपवसथ्यन्हतिश्रस्विष्टमग्नियाधेयंकुर्वंतितस्मिन्संस्थि
तेपवित्रेष्टायजेततस्पाऽसंस्थितायांतंतुमतीनिर्वपेतस्पाऽसंस्थितायां
त्रेधातव्यांनिर्वपेदपिवेज्ञाग्नेनपशुनायजेतउनराधेयंवाकुर्यादथयत्कोवकी
र्णीःयाःप्रयुंजानएवमेवैतत्कुर्यातस्मादेकोवकीजायाविंदतइतिब्राह्मण
मिति इत्यग्नीह्रयसंसर्गविधिः अथाहितानिव्रतानि आधानाद्दशरात्रमा
हिताग्निर्व्रतचारीस्यात् तऊर्ध्वं नानृतंवदेत् नमांसमश्नीयात् नस्त्रियमु

रामः
९

पेयात् नवासःप्रक्षालयेत् नमृन्मयेनपिबेत् नश्लक्ष्णायोच्छिष्टंदद्यात् नपादौ
प्रक्षालित नलवणमश्नियात् नकोद्रीधान्यमश्नीयात्अन्यत्रलिलेभ्यः नास
ग्रांशङ्गीतः कालयोर्भोजनंकुर्यात् आज्यप्लवंहविष्यमश्नीयात् नाम्नस्पार्वि
ज्यंकुर्यात् नंजीतनाम्नंजात नदंतधावनंकुर्यात् एतानिव्रतानिएतस्मोपेत्रा
तपतीस्थानेऽग्नयेव्रतपतयेस्वाहेतिश्रपणीऊतिंकुर्यात् इष्ट्यनधिकारात्
अजातव्रत्स्यक्रतुनार्यागमननदोषः वासःप्रक्षालननिषेधऊषादिनात्प
तिकः स्वयंपादप्रक्षालनेनदोषः पर्णादिनादंतधावनेच इत्याहिताग्निध
र्मः तदतिक्रमेप्रायश्चित्तान्यनिधीयंते आहिताग्निर्यथाक्रमदादिनक्षणेलि

वितआह वृथाकुसरसंयावपायसाश्यशष्कुलीः आहिताग्निर्द्विजोनुक्ताप्र
जापत्यंसमाचरेदिति आहिताग्नेःश्वनादंशेएकरात्रंसाग्येपयःपानं नानेरू
र्ध्वंद्विरात्रं वक्रेत्रिरात्रं मस्तकेचतुरात्रमित्यंगिराः श्वंचसम्मक्तदृष्टविषयं
शवदृष्टनानेरधः आपोदृष्टीयदिनिःस्नानंशाणायामत्रयंच नानेरूर्ध्वंद्विगु
णं वक्रेत्रिगुणं मस्तकेचतुर्गुणमिति स्मृत्यर्थसारोक्तेः श्वंचशृगालपुंश्चा
लीवानरखरोष्ट्रनरवराहमृगमीदृग्जाविनकुलमार्जारकुक्कुटकाकमुषका रामः
रूपलक्षणं यज्ञपात्रैर्यैर्दीनभिः गजोष्ट्रवृषनेनारीसमाख्याथवाशुमान् यो
जनेयोजनेकुक्कुमग्निश्चापिविनश्यतीति अत्रगजारोहणनिषेधोब्राह्मणस्ये १०

व राज्ञांगजारोहणवज्ञशुद्राणेषुदर्शनात् यस्यत्वंदयश्चैवकुंजरारोहमृद्धि
मत् ऐंद्रस्थानमुपासीततस्मात्तंनविचारयेदितिमार्कंडेयपुराणे याज्ञवल्क्यः अ
मिहोनस्पशूत्रस्यनान्नमद्यादनापदीति एतदन्यतमान्पनोजनेप्रायश्चित्तमाह म
नुः नुंजानोन्यतमस्यान्नंश्रमसाक्षपयेत्रहं मत्यानुक्ताचरेन्कृक्कुमिति आपदी
तुसकृद्भुक्ताएकोपवासस्तेब्रह्मकूर्चः अज्ञानादनापद्यपिसएव ज्ञात्वानापद्यपि
सकृद्भोजनेप्राजापत्यः ब्रह्मकूर्चस्यत्रहेणविकल्पःशक्ताशक्तविषयः अत्रनो
जनंनगन्धनसंयोगमात्रंकिंत्वाघ्राणाद्यर्थीतियाराशरः घ्रात्वावैवोष्मणाचैवस्पृष्ट्वा
चयतिगृह्यच यज्ञस्यस्वस्तिचेत्युक्त्वानोक्तेवतुनसंशयइतिसएव अग्रेनुरंतुव

क्ष्यामिमनुनाचोदितंसुरा। आमंवासदिवापक्वंशूद्रान्नमुपसाधयेत् किल्विषंननते
नोरुक्षयश्चाविप्रःपुरोहितः गुर्वर्थमतिर्थीनांचमृत्यानांचविशेषतः प्रतिगृह्यप्र
ज्ञातंनतुतृप्येत्स्वयंतत्तः शूद्रान्नरसपुष्टस्यअधीयानस्यनित्यशः जपतोजुह्वतो
वापिगतिरूर्ध्वंनविद्यते षण्मासंमप्रियोनुंक्तेशूद्रान्नंवनिरंतरं जीवन्नेवनरोवा
शूद्रोमृतःश्वावापिजायते अरुत्वैवनिष्कृतिंयःशूद्रान्नाश्नातेद्विजः आहिता
ग्निर्विशेषेणसूद्रऽगतिमाकुनवेदिति व्यासःशूद्रान्नरसपुष्टस्यदित्योरपिव
नित्यशः जपतोजुह्वतोवापिगतिरूर्ध्वंनविद्यते मृतसूतकपुष्टांगोद्विजःशूद्रा
न्नभोजनः अरुमेवनजानामिकोकांयोनिंसगच्छति गृध्रोघादशजन्मानिदशज

न्मानिसूकरः श्वाचैवसप्तजन्मानित्येवंमनुरुवाचह शूद्रान्ननोदरस्थेनयः कश्चि
न्म्रियतेद्विजः सनरेवसूकरोग्राम्यस्तस्यवाजायतेकुलइति आपस्तंबः यस्तुंज
तिशूद्रान्नेमासमेकंनिरंतरं ऽरुजन्मनिशूद्रत्वंमृतःश्वावाजिजायते शूद्रान्नशू
द्रस्पर्शीशूद्रेणचसहासने शूद्रातल्लानागमश्चैवज्वलंतमपिपातयेत् आहि
ताग्निस्तुयोविप्रःशूद्रान्नेवप्रवर्तयेत् पंचसप्तवर्षाणिसंतिआत्माचुसत्रयोग्नय
इति स्मंतुः राजानंतेजआदत्तेशूद्रान्नेषुत्सवर्वसं आयुःस्ववर्णकारान्नंयश
श्चर्मावकृंतनः कारुकान्नंप्रजांहंतिबलंनिर्णेजकस्यच गणान्नंगणिकान्नंच
लोकेस्मःपरिकृंतति रूपंचिकित्सकस्यान्नंपूयंश्लाघ्यानमिंद्रियं विष्टावाधुषि

कस्यान्नेज्यास्त्रविक्रयिणोमले एतेन्योन्येत्वनोज्यान्नाःक्रमशः परिकीर्त्तितः ते
षांत्वगस्थिरोमाणिवदंत्यनेनमोषिणइति तथा योहिहित्वाविवाहाग्निंगृहस्थ
इतिमन्यते अनंतस्यननोकश्चंवृथापाकःसउच्यते वृथापाकस्यभुंजानःप्रा
यश्चित्तंचरेद्द्विजः प्राणायामंत्रिरभ्यस्यघृतंप्राश्यविशुध्यतीति आपदिशू
द्रात्सकृदन्नप्रतिग्रहेदिनांतरभोजनेनदोषः अनापदित्वन्नप्रतिग्रहेपिसक
त्रिरात्रं अभ्यासेतुमासंकुर्यु अतऊर्ध्वंमासकृच्छ्रंनिःश्रोत्रियागारैः शूद्रादिभिः
स्वयंदत्वाकृतेस्वपर्यायान्नत्वंतन्नोजनेचांद्रायणमितिमाधवः स्मृतिचं
द्रिकायांमनुः येशूद्रादधिगम्यार्थंअग्निहोत्रमुपासते कृत्विजस्तेहशूद्राणां

ब्रह्मवादिषुगर्हिताइति यमः उपाध्यायधनंशूद्रात्तविप्रोनिक्षेतधर्मवित् यज्ञमा
नस्तुनिक्षिप्यचांडालःप्रेत्यजायतइति याज्ञवल्क्यः चांडालोजायतेयज्ञकरणा
तश्चनिक्षेतादिति मनुः यज्ञार्थमर्थंनिक्षिप्यायोरसर्वंक्षयंछति सयातिनास्तां
विद्यःकंकतांवाशतसमाः यमःयज्ञार्थंनिक्षिप्तंऽन्यंमन्यत्रविनियोजयेत् श्व
पाकयोनेजायेततदनुक्तातुऽर्मतिमिति तथा यज्ञार्थंनिक्षिप्तंऽन्यंमन्यत्रविनि
योजयेत् प्राप्नादोस्यादपाक्तेयोनासयोनिचगछतीति यानितुत्रिकांडम
ंडनेक्वचनानि निर्दैनोधनसाध्येषुनित्येष्वधिकृतोयति स्वोर्यादन्येकुमार्गेरि
पांस्वर्थंधनमर्जयेत् सूर्यग्रहेकुरुक्षेत्रेमेषांकृष्णाजिनादिकं चांडालाप्रतिगृ

ह्यापियजेदावस्पकेमेरवेति तानिनऽष्टप्रतिग्रहातुग्रहकाणिकिंतुनित्यकर्मणां
आवश्यकंत्वद्योतकानि यदोपक्रान्तोयज्ञोमध्येकथंविरमेतिवह्वस्तदातुशूद्र
देस्तदाहृत्यारब्धंकर्मसमापनीयमेनेत्यात्याङ्गमनुः यज्ञश्चेत्स्रुतिवद्वः स्याद्य
केनांगेनयज्वनः ब्राह्मणस्यविशेषेणधार्मिकेसतिराजनि योवैशूपः स्याद्ब्रा
प---ईनिक्रतुरसोपमः कुटुंबातस्यतद्यंआहरेद्यज्ञसिद्धये आहरेत्री
णिवाहारेवाकामेशूद्रस्यवेश्मनः योनाहिताग्निःश्रुत्यगुरुयज्ञांवसहस्रगुः त
योरपिकुटुंबार्थंआहारेदविचारयन्निति विशेषेतिक्षत्रियादेपिप्रारब्धेप
तिबंधेकथंचिदपिसमापनंविधीयते एवमपिज्वालानेत्रित्रिकांडमंडनस्तु

राम:
१३

वचसांग्रहृतिः परंतुतत्तऽष्टप्रतिग्रहेणयज्ञादिकारणेतत्तत्स्वाय्यश्चिंतंनवत्ये
व तदाहमनुः जपित्वात्रिणिसावित्र्याःसहस्राणिसमाहिताः मासंगोष्टेपयः।
पीत्वामुच्यतेसस्तप्रतिग्रहादिति समाहितःब्रह्मचारी। मासेगोष्टेवसन्नश्नन्व
त्रिसहस्रंजपेत्पयश्चपिबेदित्यर्थः अत्रासंतुहारीतः पवित्रेष्टाविशुध्यंति
सर्वेषेष्टाः प्रतिग्रहाः एंडंवेनमृगारेष्टाकेचिन्मित्रविंदया षष्टकालेपयोभ
क्षः प्रणेमासेप्रमुच्यते तर्पयित्वाद्विजान्कामैः सततंनियतव्रतइति प्रतिग्र
हेसत्येदशतः कालतोजानीतःस्वरूपतश्चा अन्यतरासत्येषदृत्रिज्ञानेतेपवि
त्रेष्टामृगारेष्टाःमित्रदेयाश्चविकल्पेनविधानात् पवित्रेष्टादयोवक्ष्यंते य

ज्ञपार्श्वे राजप्रतिग्रहोघोरोमधास्वादोविषोपमः सुत्रमांसंवरंनोकुंनतुराज्ञ
तिग्रहइति तथा नकुर्यात्कृषिवाणिज्यंसेवाहस्तिनंतथैवच ब्रह्मण्यार्द्धीयतेतेन
तस्मात्तंचविवर्जयेत ग्राममध्यगतोयावच्छवस्तिष्ठतिकस्यचित् ग्रामस्यतस्यका
शौचंनिगतेसुचिताभियादितिमनुर्विहतस्याशौचस्यापवादमाहपराशरः ब्र
ह्मचारीगृहेयस्यांऽघतेचहुताशनः संपर्कंनचकुर्वंतिनतेषांसूतकंनवेदिति
तथा राजान्नदातापितराचार्यर्त्विकपुरोहिताः एतेषांप्रतिकूलेतुवसाद्येषु
विशुध्यतीति तथा अन्नदोनयतश्चैवतथाऋत्विकपुरोहिताः एतेगुरुसमाह
यानेषुप्रतिषुरुवश्चरेत् यथावयगुरुर्ब्रूयात्तत्कार्यमविशंकयोः निग्रहनुग्रह

MEMORIAL
राम

वापिगुरुः सर्वत्रकारणमिति अथैनवतियःपापयश्रुभगृहीतः स्याद्योवापराधेतदे
वेभ्यःऋषिभ्यःपितृभ्योगोब्राह्मणेभ्यःस्तेयेनाभिशस्तोभिशस्यमानोवारहस्येसायदे
तेतिबौधायनः तथा उपास्यपश्चिमांसंध्यांऊत्वाग्निंस्तनुपास्यव न्हत्येपरिहरेनु
ज्ञानातित्रेतायसंविशेदिति द्वितीयभोजनस्यावश्यकत्वं ऋतौभार्यामुपेयादि
त्यत्रनियमविधिंसाधयतामित्याक्षराकारेणसायंप्रातर्द्विजातीनांभोजनंभ्रुतिवो
दितं नांतरभोजनंकुर्यादग्निहोत्रसमोविधिरित्यत्रनियमार्थत्वेनसाधितं तेनहि
तीयभोजनेसमर्थेनतदकुर्वताप्राणायामशतंकुर्यात् सर्वपापानुन्नये उपपात
काजातानामनादिष्टेषुचैवहीति प्रायश्चित्तमाचरणीयं इदमेवसर्वज्ञस्मृतेः

नादिष्टप्रायश्चित्तं तथामनुः वेदोदितानांनित्यानंकर्मणासमतिक्रमेस्नातकव्र
तलोपेचप्रायश्चित्तमनोजमिति एतदपवादमाहमाधवीयेशौवागमः अत्यंत
रोगद्युक्तेगोराजचोरनद्यादिषु गुर्वग्निदेवरुत्पेषुनित्यहानौनदोषइतिपर्व
णिस्त्रीगमनेप्यनोजनमेवेतिशूलपाणिः यदाकदावादिवामैथुनेगोयानेवानद्या
मेस्नात्वाप्राणायामेनशुद्धिः अन्यासेतुशतंप्राणायामाइतिमनुः नद्यांपरस्त्रीदृष्ट्वा
दिनमेकमनोजननोजनमितिशूलपाणिः एतत्सचपतितपदोक्तप्रायश्चित्तैःसमुच्चय
ः पाणिहिताग्निर्दुस्वप्ननिमित्तश्रुतादिदर्शनीनिमित्तेनयंयश्चेपद्य तदायतइंद्रनयाम रामः
२० उतयेऽ हास्वस्तिदावि०स्वाहा इंद्रोदेवता इदंस्तुवाकृतिहयसर्वाधानिनालो। १५

किकाग्नेश्चधीधानिनास्मान्नीग्निमताचौपासनेहोतव्यंक्षचोर्जयएवेतिशतद्वयीना।
ये चक्रनार्यस्याग्निहोत्रादिशुश्रूषायांविशेषमाहः माधवीयेकात्यायनः अग्नि।
होत्रादिशुश्रूषांचक्रनार्यःसवर्णयः कारयेतक्रुतेचज्येष्टायागार्हतानचेत्
तथावीरस्करासांश्चजासंपादिनीचया दक्षाश्चियंसदाशुद्धातामत्रविनियोजये
त् निरक्रमेणचाकर्मयथैज्येष्टमक्षितः विभज्यसहवाकुर्युर्यथाज्ञानमशक्ति
तश्चतिश्चजापतिः दर्शेचपौर्णमासंचलुप्त्वाक्रतुनयमेववा एकस्मिन्क्रतुपादेनद
योर्ध्वेनश्रोधनं हवियज्ञेष्टशक्तस्यलुप्तमप्येकमादितः याजापत्येनशुध्यंत्या
कसंस्थाक्रचैवहि संधोपासनहानौतुनित्यस्नानंविलुप्यच होमंनैमित्तिकंशुध्यो

यत्राष्टसहस्रकृत्व समांतेसोमयज्ञानांहानोवांऽयणंचरेत् अकृत्वान्यत्तमंयज्ञे
यज्ञानामधिकारतः जपवासेनसुश्रेतपाकसंस्थाश्चैवहि कात्यायनः पित्र्य
ज्ञात्यर्थेवैवैश्वदेवात्पर्यपिच अनिष्टानवयज्ञेननवान्नश्राद्धानेतथा नोजनेप
तितान्नस्पवरुर्वैश्वानरोनवेदितितुस्मार्तविषयं श्रौहिताग्नेरिष्टिविधानात् तथं
विकल्पोनुत्तरियाश्चनग्नश्चावस्त्रएवच श्रोतंस्मार्तंतथाकर्मननग्नश्चित्तयेदपि न
श्रोमलिनमस्त्रस्यान्नग्नश्चार्द्रपटःस्मृतः नग्नस्तुदग्धवस्त्रस्यानग्नः स्फनपटस्त
थेति धौतवस्त्रानावेयाज्ञवल्क्यः अलाभेधौतवस्त्रस्यशाणक्षौमाविकानिच कु
तुपंयोगपटंचविवासास्तुनवेनवेदिति कुशाधारणमाहज्ञातीतपः जपहोमेचदा

नेचस्वाध्यायेपितृतर्पणे अश्नन्पेतुकरंकुर्यात्क्षवर्णरजतेकुशैरिति अस्नातस्यहो
मेनिषेधमाहदक्षः अस्नात्वानाचरेत्कर्मजपहोमादिकंनचेति प्रातःस्नान
संक्षेपमाहसएवअल्पत्वाद्धोमकालस्पर्शत्वात्स्नानकर्मणः प्रातसंक्षेपतःस्नानं
होमलोपविगर्हितइति ऊर्ध्वपुंड्रस्यावश्यकत्वमुक्तब्रह्माण्डपुराणे सूनाकालेचहोमे
चसायंप्रातःसमाहितः नामान्युच्चार्यविधिनाधारयेदूर्ध्वपुंड्रकंमिति कर्मकाले
अधरांगस्पर्शनिषेधवाङ्नियमेचाहबोधायनः नानेरधस्पर्शीकर्मस्रुसंयुक्तोवर्ज
येदिति जपकालेननाषेतव्रतहोमादिकेष्वपिचेति लोपेयोगयाज्ञवल्क्यः यदिवा
ग्यमलोपस्याज्जपादिषुकदाचन व्याहरेद्वैष्णवंमंत्रंजपेद्वाविष्णुमव्ययमिति दक्षः

संध्याकर्मावसानेतुस्वयंहोमोविधिप्यते स्वयंहोमेफलंयस्मात्तदन्येननलभ्यते
होमेयत्फलमुद्दिष्टंजुह्वतःस्वयमेवतु ह्रूयमानेतदन्येनफलमर्धंप्रपद्यते क्षत्रि
कुषुत्रोगुरुत्रातानाग्निनेधेयोविदूषतिः एतैरपिजुतंयस्मात्तद्धुतंस्वयमेवतु
होतृतारतम्यमाहात्रिः अन्येःज्ञातजुताद्धोमादेकश्शिष्यजुतोवरं शिष्येःज्ञातजुता
द्धोमादेकःपुत्रजुतोवरं पुत्रेःज्ञातजुताद्धोमादेकोह्यात्मजुतोवरमिति यजमाना-
योरसान्निध्येहोमस्यनैष्फल्यमाह गोपालः असमक्षंतुदंपत्योर्हौतव्यंनर्त्विगा
दिना द्वयोरप्यसमक्षंतुनवेद्धुतमनर्थकं इतिकात्यायनः आहनोल्यविद्यान
बालिशाःहोतास्मादग्निहोत्रस्यनाशीनासंस्कृतस्तथा नरकंह्यपतंत्येतेजुह्वत १७

सत्वध्यस्यतत्रतस्माद्धेतानकुशलोहोतास्याद्वेदपारगः इतिजुह्वतश्चानिवाद
ननिषेधमाहापस्तंबः जपंहोमंचकुर्वाणोनानिवाद्यस्तथाहिजाजलिः संध्यानुष्ठा
नस्यबहिर्देशेप्राप्तस्तेपि तेनसंध्यंतुकर्त्तव्यंवासणेग्रहेष्वपीतिविधानंआहिता
ग्निपरं तस्यापिऋत्विगुत्तरंआहोममासत्सेर्बहिर्गमननिषेधात् अतएवकेशो
वोध्वर्योरपिविहरणोत्तरंविहारमध्यएवसंध्यानुष्ठानमाह नचसंध्याहोम्योः
समानकालतायांआरब्धतत्रत्वाहोमस्यप्राबल्येनसंध्योत्कर्षःशंकाः संध्याही
नोश्रुचिर्विप्रोह्यनर्हःसर्वकर्मसु यदन्यत्कुरुतेकर्मनतस्यफलभाङ्मनवेदिति
दक्षवचसानुत्कर्षविधानात् त्रिधाविभक्तस्यान्होद्वितीयोनागःसमित्कुशा-

याहरणकालः समित्पुष्पकुशादीनांसकालः समुदाहृतश्रुतिदक्षोक्तेः आहिता
ग्नेरथाग्नवासनिषेधोमार्कंडेयपुराणे अशस्यतेनग्नवासोब्राह्मणानांकथंचन सतो
गृहेद्विजाग्र्यस्यनिष्पतिःसर्वकर्मणां नित्यैनैमित्तिकानांतुहानिरेवाग्न्वासिनां नि
त्यैनैमित्तिकोनांहिहान्यहानिर्द्विजन्मनां सायंप्रातर्हुतंहव्यलोकान्यच्छतिरश्मय
तः त्रैलोक्यमेतदखिलंहव्यएवप्रतिष्ठितं अनीशवर्हिषःस्थास्नुःस्थाणोरीशस्यतत्त्वयोग
यः रम्यंचैवाग्निशरणंवेदिर्विष्टरणीतथा ननोगार्हपत्यविधानाणांग्न्यभ्यात्म
स्पृश्यतांनरः क्रियेकडकरीयेवाराजवान्यावह्निनी पापकृत्कृच्चविप्रेषुनिय
तोजंतुरत्रकश्चित् नित्यकर्मपर्यालडग्न्यग्नवासंविनाग्न्यानेतुरग्न्याजनीर्यंत्रिव

सेन्नतुतीर्थीद्यर्थं तदाहत्रिकांडमंडनः धनान्पर्जन्यपयितुंयुक्तः ग्नवासेह्यग्नि
होत्रिणः धनैर्हिसंभवेद्विज्यातीर्थीद्यर्थंनतुव्रजेतश्रुति तत्रापवधिमाहदेशतः
कालतश्चसएव अग्निहोत्रेणरहितःपंथानंशतयोजनं आहिताग्निः ग्नयाया
च्चेदग्निहोत्रंविनश्यति अवंस्वयमजुह्वानोहावयेदृत्विगादिना तस्मात्पुनरा
धानंग्नविश्रेष्टिरथापिवेति बौधायनः अथोपतप्तोपरिमितंग्नवसतिनसंवत्स
रमितिग्नवसतिश्रुत्यविशेषाज्जायापत्योराहिताग्नोर्विज्ञायतेर्हवाएषआत्म
नोपत्नीचेति तेनपत्नीग्नवासेप्येतत्प्रायश्चित्तं स्मार्ताग्निमतःश्रौतिकायांपेटिप्र
सिः श्रुत्यवलीकृतधर्मस्यपीडपमानस्यशक्तिनिः मासत्रयंग्नवासोस्तिपरतोनाहि

ताग्निवदिति यज्ञपार्श्वे नाग्निकार्यस्पवेलायांप्रवासेन्नवपर्वणि नविनाव
निमित्तेनक्रीडाद्यर्थंवनंव्रजेत् आहिताग्निस्तुयोलोनात्प्रवासेपर्वसंधिषु क
रोतिश्वनराधानंप्रायश्चित्तमृतावृतौ अपरिमितंप्रोष्यनउपवसथसमीपेत्रयो
दश्यांश्चावतुर्दश्यांवानगच्छेत् सोधःशायीप्रवेसत् आमीषवर्जंभुंजीत वऊप
लीकृएकयासहगछेच्चेन्मैथुनंनकुर्यादितिकेशवः एकयासहगमननिषिक्त
मोदाशरद्राविषयमितिचंद्रिकायां ब्रह्मांडपुराणे अनापद्यपिधर्मेणयाऽपत
ःशिष्मतःस्तथा गल्लंप्रतिग्रहंविप्रोनधर्मीपरिहीयतइति तथा आहिता
ग्निरनड्वांश्चब्रह्मचारीतथैवच अन्नंतएवमिथंतिनेषांसिद्धिरनन्नतमिति

यज्ञपार्श्वे परान्नपक्वंनाश्नीयंप्रवासेनाग्निहोत्रिणा इक्षुक्षीरविकाराश्चन्नष्ट
मृषयवाश्रपि अन्नंदेवाग्निहोत्रंचयक्वंकेवलपावके तदन्नंफलवद्ग्राह्यंशरद्राद
लिनउष्मति खण्डंचुविधानान्पयाचितंजातवेदसि तदन्नंफलवद्ग्राह्यंशरद्रादपि
नउष्मति तंडुलोमंचुसंयोगापिंडलवणयोगतः पानीयमन्नसंयोगात्फलंत्रित
ययोगत परान्नपक्वंनाश्नीयाद्गुडगोरसमंतरा आहिताग्निनयंधर्मोयाज्ञिकानां
तुसंमतः बृहस्पतिःसर्वाधान्यथवाप्यर्थाधानीवाह्यावसथ्यकः परस्परंतुभुंजीयु
रेविरुद्धास्त्वयोमताइति वृद्धशौनकः सर्वाधानीदक्षिणाग्नौसान्नंपाकादिकं
चरेत् तदर्थमेसमेज्ञेयोवृत्तेकर्मणिलौकिकः प्रचेताः कृतेहोमेतुनष्टस्यात्कदा

यिदक्षिणाग्निकः सायंकृत्वाथकर्तव्यंनोऽन्नंविधिपूर्वकं पचातमोपचेदन्नंन
पचेलौकिकाग्निके यदिन्नात्मापचेदन्नंनुक्ताचांद्रायणंचरेदिति याज्ञवल्क्य
गृहीत्वाग्निंसमारोप्यःपरान्नंनिषेवते अनोज्यान्नोगृहस्थोसौवेदवादीशुद्ध्यति
तः परान्नेनोदरस्थेननार्योसमपिगच्छति यस्मानंतस्मतेपुत्रान्नान्नेतःप्रवर्तते
वरंकंदफलाहारोवरंवायोश्चभक्षणं उत्तमांसंवरंतातनानग्निगृहभोजनमि
ति आहिताग्नेःपत्नीसहितस्याग्निन्विहायनप्रवाऽतिपूर्वमोवोक्तं यत्तुविरा
ट्पर्वणिनष्टपर्यारंभेयोग्यनपुरोहितेनस्वाश्रमंप्रतिनयनंश्रूयतेयुधिराग्निनांन
तदन्येषांब्राह्मणानांप्रयोजकं तथात्वेपाचालीगतसर्वधर्माणामप्रसंगात् किंच

DR. SHAU DAJI MEMORIAL
राम:
१७

क्षत्रियकर्तृकनष्टचर्याविधौहितस्यपुरोहितकर्तृकाग्नित्यनस्तादृग्विधानंतान्यत्वे
वप्रकृतेनान्यत्रप्रसक्तिः निन्नएवाहिताग्निक्षत्रियधर्मः निन्नश्चब्राह्मणानां यथाश्वा
श्वलायनः राजन्यस्याग्निहोत्रंकुर्जुयातपस्विनेब्राह्मणायेतरंकालंनक्तमुपहरेदतस्त
त्पशीलःसोमसूःसदाजुहुयादिति चशब्दोवैश्योपलक्षणार्थइतिकृत् तथासोमयागे
क्षत्रियस्ययजमानस्यसोमपानानावः न्तेयेनब्राह्मणस्य तथाराजकार्यपुरोहितइति
वचनेनक्षत्रियकर्मणांपुरोहितकर्तृकतायाएवाम्नानंनतुनित्यतावेति एतेनबलरा
मतीर्थयात्रायांपत्नीपुरोहिताभ्यांमाहरणमग्नीनांचव्याख्यातं इत्याहिताग्निधर्मः श्र
वाहित्यमनंतेनगुरुणाकरुणाब्धिना आधानगोचरंप्रायश्चित्तंतत्त्वनिरूपितं इत्यनंतदे

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

वीयरघुनाथविरचितेप्रायश्चितकुतूहलेआधानप्रकरणं ३६० ॥ ॥श्रीरामायनमः
॥श्रीलक्ष्मणजीमहाराजेभ्यो॥ ॥ॐनमोनारायणायनम॥ ॥ श्रीशिवायनम॥ ॥
टोपरोपनामकग्रामस्थसज्जनयरामेणसंपादितं

॥अनंतदेवकृतआहिताग्निधर्म॥प्रायश्चितसह॥